॥श्रीः॥

## शिशुगीतम् १

रामः याति । रामः याति ।
सीतया सह । सीतया सह ।
कुत्र सः याति ? कुत्र सः याति ?
सरयूनदीम् ।

कृष्णः याति । कृष्णः याति ।
राधया सह । राधया सह ।
कुत्र सः याति ?
यमुनानदीम् ।

विठ्ठलः याति । विठ्ठलः याति ।
रुक्मिण्या सह । रुक्मिण्या सह ।
कुत्र सः याति ?
चन्द्रभागाम् ।

## śiśugītam 1

rāmaḥ yāti । rāmaḥ yāti ।
sītayā saha । sītayā saha ।
kutra saḥ yāti ? kutra saḥ yāti ?
sarayū nadīm ।

kṛṣṇaḥ yāti । kṛṣṇaḥ yāti ।
rādhayā sahaḥ ।rādhayā saha ।
kutra saḥ yāti ? kutra saḥ yāti ?
yamunā nadīm ।

viṭhṭhalaḥ yāti । viṭhṭhalaḥ yāti ।
rukmiṇyā saha । rukmiṇyā saha ।
kutra saḥ yāti ? kutra saḥ yāti ?
candrabhāgām ।

## शिशुगीतम् २

मम दश अङ्गुल्यः
द्वे मम नेत्रे
एका दीर्घा नासिका
द्वौ मम कर्णौ
बहवः दन्ताः
एका जिह्वा
एकं वदनं
देवकीर्तनाय

## śiśugītam 2

mama daśa aṅgulyaḥ
dve mama netre
ekā dīrghā nāsikā
dvau mama karṇau
bahavaḥ dantāḥ
ekā jihvā
ekaṁ vadanaṁ
devakīrtanāya

| शिशुगीतम् ३ | śiśugītam 3 |
|---|---|
| गज आयाहि गज आयाहि!<br>गज आयाहि गज आयाहि रे | gaja āyāhi gaja āyāhi!<br>gaja āyāhi gaja āyāhi re |
| उदरं लम्बम् अस्ति,<br>दन्तौ सितौ स्तः<br>शुण्डा दीर्घा अस्ति,<br>कर्णौ विततौ स्तः | udaraṃ lambam asti,<br>dantau sitau staḥ<br>śuṇḍā dīrghā asti,<br>karṇau vitatau staḥ |
| गज आयाहि गज आयाहि!<br>गज आयाहि गज आयाहि रे | gaja āyāhi gaja āyāhi!<br>gaja āyāhi gaja āyāhi re |

| शिशुगीतम् ४ | śiśugītam 4 |
|---|---|
| पाठशालां गच्छामि<br>आचार्यानहं प्रणमामि<br>मित्रैः साकं वर्गं गत्वा<br>अक्षरमालां कथयामि ॥ | pāṭhaśālāṃ gacchāmi<br>ācāryānahaṃ praṇamāmi<br>mitraiḥ sākaṃ vargaṃ gatvā<br>akṣaramālāṃ kathayāmi ॥ |
| अरुणः वदति अ आ इ ई<br>उदयः वदति उ ऊ ऋ ॠ ऌ<br>एला कथयति ए ऐ ओ औ<br>अहमपि वदामि अं अः ॥ | aruṇaḥ vadati a ā i ī<br>udayaḥ vadati u ū ṛ ṝ ḷ<br>elā kathayati e ai o au<br>ahamapi vadāmi aṃ aḥ ॥ |
| कृष्णः कथयति क ख ग घ ङ<br>चैत्रा वदति च छ ज झ ञ<br>टामः ब्रवीति ट ठ ड ढ ण<br>तारा भणति त थ द ध न<br>पवनः पठति प फ ब भ म | kṛṣṇaḥ kathayati ka kha ga gha ṅa<br>caitrā vadati ca cha ja jha ña<br>ṭāmaḥ bravīti ṭa ṭha ḍa ḍha ṇa<br>tārā bhaṇati ta tha da dha na<br>pavanaḥ paṭhati pa pha ba bha ma |

| | |
|---|---|
| यमुना वदति य र ल व<br>शङ्कर आह श ष स ह<br>इत्थं सर्वे वदाम वर्णान् ॥ | yamunā vadati ya ra la va<br>śaṅkara āha śa ṣa sa ha<br>itthaṃ sarve vadāma varṇān ॥ |
| **शिशुगीतम् ५** | **śiśugītam 5** |
| मार्गं पश्य मार्गं पश्य<br>यानं याति भोः<br>यानं याति भोः<br>नानारूपं यानम्<br>नानावर्णं यानम् ॥ | mārgaṃ paśya mārgaṃ paśya<br>yānaṃ yāti bhoḥ<br>yānaṃ yāti bhoḥ<br>nānārūpaṃ yānam<br>nānāvarṇaṃ yānam ॥ |
| एकचक्रं यानं<br>क्रीडारङ्गे अस्ति ।<br>द्विचक्रकं यानं<br>ग्रामे नगरे चास्ति ॥ | ekacakraṃ yānaṃ<br>krīḍāraṅge asti ।<br>dvicakrakaṃ yānaṃ<br>grāme nagare cāsti ॥ |
| त्रिचक्रकं यानं<br>शीघ्रगामि भवति ।<br>चतुश्चक्रं यानं<br>सर्वोपयोगि भवति ॥ | tricakrakaṃ yānaṃ<br>śīghragāmi bhavati ।<br>catuścakraṃ yānaṃ<br>sarvopayogi bhavati ॥ |
| भारवाहकं पश्य<br>कारयानं पश्य ।<br>धूमशकटं पश्य<br>लोकयानं पश्य ॥ | bhāravāhakaṃ paśya<br>kārayānaṃ paśya ।<br>dhūmaśakaṭaṃ paśya<br>lokayānaṃ paśya ॥ |

| | |
|---|---|
| विद्युच्छकटं पश्य<br>विमानमेकं पश्य ।<br>क्षेपणीयानं पश्य<br>पुष्पकयानं चिन्तय ॥ | vidyucchakaṭaṃ paśya<br>vimānamekaṃ paśya ।<br>kṣepaṇīyānaṃ paśya<br>puṣpakayānaṃ cintaya ॥ |
| **शिशुगीतम् ६** | **śiśugītam 6** |
| कुत्र त्वं गच्छसि?<br>उद्यानं गच्छामि ।<br>तत्र किं पश्यसि?<br>पुष्पवाटिकां पश्यामि ।<br>दृष्ट्वा किं करोषि?<br>भ्रमणं करोमि ।<br>तेन किं जायते?<br>आरोग्यं वर्धते । | kutra tvaṁ gacchasi?<br>udyānaṁ gacchāmi ।<br>tatra kiṁ paśyasi?<br>puṣpavāṭikāṁ paśyāmi ।<br>dṛṣṭvā kiṁ karoṣi?<br>bhramaṇaṁ karomi ।<br>tena kiṁ jāyate?<br>ārogyaṁ vardhate । |
| **शिशुगीतम् ७** | **śiśugītam 7** |
| गुरुं वन्दे मातृरूपम्<br>गुरुं वन्दे पितृरूपम् ।<br>गुरुं वन्दे करुणामयम्<br>गुरुं वन्दे विज्ञानमयम् ॥<br>गुरुं वन्दे सिद्धिप्रदम्<br>गुरुं वन्दे बुद्धिप्रदम् ।<br>गुरुं वन्दे विमलमतिम्<br>गुरुं वन्दे अमलकृतिम् ॥ | guruṃ vande mātṛrūpam<br>guruṃ vande pitṛrūpam ।<br>guruṃ vande karuṇāmayam<br>guruṃ vande vijñānamayam ॥<br>guruṃ vande siddhipradam<br>guruṃ vande buddhipradam ।<br>guruṃ vande vimalamatim<br>guruṃ vande amalakṛtim ॥ |

| शिशुगीतम् ८ | śiśugītam 8 |
| --- | --- |
| उद्यानं गच्छामि<br>मित्रैः साकं क्रीडामि ।<br>मित्रैः साकम् एकीभूय<br>लोककार्यं रचयामि ॥ | udyānaṃ gacchāmi<br>mitraiḥ sākaṃ krīḍāmi ।<br>mitraiḥ sākam ekībhūya<br>lokakāryaṃ racayāmi ॥ |